# हस्तदर्शनस्य समयः

डॉ. सीमा शर्मा

सर्वग्रन्थानुसारं हस्तदर्शनाय प्रातः कालः सर्वोपयुक्तोऽस्ति। तस्मिन् समये जातकहस्तपरीक्षकयोः चित्तः शान्तः स्थिरः भवति। अस्मात्परं द्विपहरे त्रिपहरे वा हस्तदर्शनमुचितम्। उक्तञ्च -

**हस्तसञ्जीवने –**

**रात्रौ दीपं पुरस्कृत्य सपूज्यैवं यथाविधि।**
**स्त्रियो वामकरः वामे स्वहस्ते न्यस्य वीक्षयेत्।।**
**हस्तं स्वदक्षिणे हस्ते न्यस्यावहितमानसः।।**
**यो नरः स्त्रीप्रकृतिस्तत्करो वीक्षते बुधैः।**
**मध्याह्नात्परतः स्त्रीणां नृस्वभावे निशीथतः।।**

स्त्रीगुणैः युतपुरुषस्य करं मध्याह्नात् पश्चात् मध्यरात्र्याः पूर्वे तथा पुरुषगुणैर्युतस्त्रियाः हस्तं मध्याह्नस्य पूर्वं दर्शयेत्।

विषयेऽस्मिन् कथितं हस्तदर्शनं शुभदिवसनक्षत्रकालेषु च कुर्यात्–

**''शोभने हस्तनक्षत्रे ग्रहे सौम्ये शुभे दिने।**
**पूर्वाह्ने मंगलैर्युक्ते परीक्षेत विचक्षणः।।**

**कथितमपि सामुद्रिकरहस्ये–**

''महाप्रत्यूषे, सन्ध्यायां, निशीथे, मध्याह्ने, हास्यसदसि, प्रयाणरथे, मार्गे, लिपिमन्तरा फलपुष्पमुद्राग्रहणं बिना रेखावलोकनं न कर्तव्यम्।

देवानां प्रियसन्निधौ पण्डितशौण्डान्तिके वराटकानां समीपे च रेखावलोकनं निषिद्धम्।

सुदर्शनाः स्निग्धशोभनदशनाः युवानो विहसितवदनश्चेत्तर्हि सुखेन रेखा द्रष्टव्येति।

आधुनिकग्रन्थेष्वपि मतमिदं स्वीकुर्वन्ति ग्रन्थकाराः। अर्थात् एकान्ते, शुभसमये, हासरहितस्थाने, आदिषु एव हस्तदर्शनमिति।

**कं हस्तं वीक्षयेत्–**

भारतीयमतानुसारं पुरुषाणां दक्षिणं स्त्रियाश्च वामकरः प्रधानो भवति। वामहस्ते जन्मजातगुणावगुणानां समावेशः तथा दक्षिणे एतेषु गुणदोषेषु स्वकर्माचारविचारव्यवहारैश्च कृतपरिवर्तनम् अस्ति। अतः द्वौ हस्तौ महत्त्वपूर्णौ। तथापि केषुचित् ग्रन्थेषु पुरुषस्य दक्षिणः स्त्रियाः वामकरश्च प्रधानमिति कथितम्।

आधुनिकविचारकेषु केचित्तु वामस्य तथा च केचित् दक्षिणहस्तस्य प्राधान्यं आमनन्ति। प्रसिद्धदार्शनिकारस्तूमहोदयस्य मते- ''हृदयस्य विशिष्टरूपेण पार्श्वे स्थित: वामहस्त: महत्त्वपूर्ण इति।''

कश्चिताधुनिकविचारक: कथयति- The left is the hand, we are born with it and the right is the hand, which we made.

प्राचीननानाग्रन्थेषु स्त्रीपुरुषाणां वामदक्षिणहस्तस्य प्राधान्यं वर्णितम्। केषुचिदेव ग्रन्थेषु अवयस्कस्य अर्थात् पञ्चदशवर्षेभ्य: न्यूनस्य बालकस्य विशेषनियमा: न सन्ति। परन्तु आधुनिके तु तस्य वामभागं प्रधानं मत्वा तं दर्शयेत्। 18-20 वर्षीयबालक: कर्मक्षेत्रे रत: नास्ति। अत: तस्य वामहस्तऐव पैतृकसंस्कारपूर्वसञ्चितकर्माणाञ्च प्रतीको भवति।

हस्तसञ्जीवने कथितम् -

**''त्र्यंशत्वात् बालकस्यापि सुभगस्य विलोयेत्।**
**वामहस्तात्फलं पदशवर्षाणि किञ्चन।।''**

**हस्तपरीक्षणस्य सामान्यनियमा-**

हस्तपरीक्षणस्य केचित् नियमा: कथिता:- यथा- ज्योतिषी कीदृश: भवेत्, जातक: कीदृश:, दक्षिणाविधानं, पूजाविधानं ज्योतिषिकस्य गुणाश्चादय:।

**ज्योतिर्विद: गुणा:-**

बृहत्संहितायां विषयेऽस्मिन् कथितम् - ''ज्योतिषी सांवत्सर: दैवज्ञश्चेति नाम्नापि अभिधीयते। तत्र गुणा:। शुचिर्दक्ष: प्रगल्भो वाग्मी प्रतिभावान् देशकालवित् सात्विको न पर्षद्भीरु: सहाध्यायिभिरनभिभवनीय: कुशलोऽव्यसनी शान्तिकपौष्टिकाभिचारस्नान-विद्याभिज्ञो विबुधार्चनव्रतोपवासनिरत: स्वतन्त्राश्चर्योपादितप्रभाव: पृष्टाभिधाय्यन्यत्र दैवात्ययात्। ग्रहगणितसंहिताहोराग्रन्थार्थवेत्तेति।।''

**ज्योतिषीद्वारा हस्तदर्शनविधि:-**

ज्योतिषी सर्वप्रथमं हस्तदर्शनात् पूर्वे स्वहृदये स्वेष्टदेवं संस्मृत्य संपूज्य च शान्तस्थिरचित्तेन एकान्तेरव हस्तं दर्शयेत्, फलं वदेत् उक्तं हस्तसञ्जीवने -

**''गुरु: पद्मासनासीनो वाङ्मयं हस्तजीवनम्।**
**सम्पूज्य संस्मरन्स्वेष्टदेवं गुरुं फलं वदेत्।।''**

फलकथनप्रकारसम्बन्धे ज्योतिषिकेन ध्यातव्यं यत् 'सामुद्रिकरहस्यानुसारेण - ''शुद्धयुवपुरुषाणामायु: कर्म (माता-पिता) सुखदु:खविद्याविवाहलाभालाभयशो मित्रामित्रपापपुण्यस्थानजन्यसुख-पुत्री-पुत्रभ्रातृभगिनीसंख्यातज्जनितसुखादय: जीवनादिकं वृत्तिकीर्तयश्च वक्तव्या इति।''

**हस्तप्रदर्शनस्य विधिः-**

प्राचीनग्रन्थेषु हस्तदर्शनप्रदर्शनस्य विषये यदुक्तं तथापि उपयुक्तमस्ति। जिज्ञासुजनः प्रातःकाले स्वकार्यैः निवृत्य सर्वगुणयुक्तः भूत्वा हस्तपरीक्षकाय स्वश्रद्धानुसारं श्रीफलं पुष्पं फलं मिष्ठान्नं वा दत्वा शान्तचित्तेन स्वहस्तं प्रदर्शयेत् अन्यथा विफलं भवति।

**यथोक्तं हस्तसञ्जीवने -**

**''प्रातः शुचिः कृतस्नानो देवानभ्यर्च्य सादरम्।**
**सुगन्धिद्रव्यैः पुष्पैश्च नैवेद्यैः विविधैः स्तवैः।।**
**गुरुं नत्वोपदेशं च श्रुत्वा धर्मस्य तत्त्ववित्।**
**प्रतिलभ्यान्नपानाद्यैर्विधिवद्भुक्तभोजनः।।**
**सुवेषश्चिन्तया हीनः समधातुर्जितेन्द्रियः।**
**हस्तं श्रीफलपुष्पाद्यैः प्रपूर्य विनयान्वितः।।**
**हस्तं न्यस्य गुरोः पार्श्वे स्वहस्तं दर्शयेत्सुधीः।।''**

**ज्योतिषिकाय दक्षिणाविधानम् -**

स्वशक्त्यानुसारं ज्योतिषां कृते दक्षिणादानं परमावश्यकं वर्तते, अन्यथा फलं सार्थकं न भवति। दक्षिणायाः कृते कथितं ग्रन्थे हस्तसञ्जीवने -

**''यजमानं फलं श्रुत्वा गुरोस्तथेत्युदीरयेत्।**
**निदर्श्य नाणकं रौप्यं स्वव्यापारं समाचरेत्।।**
**इत्येवं विधिना गुरुर्गुरुमतिः पञ्चाङ्गुलीं वीक्षयेत्।**
**वश्यं तस्य भवेदवश्यमचिराल्लोकत्रयं सद्गुणैः।।**
**वृष्टिः स्वर्णमयी च मेघविजयात्संजायते तद्गृहे।**
**मौलौ माल्यमिवास्य शासनमहो भूमीभुजो विभ्रति।।''**

*संस्कृत शिक्षिका, दिल्ली सरकार*